# Shri Ganesha Stuti Virochanatrishirasakrita

# વિરોચનાત્રિશિરસકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Virochanatrishirasakrita

File name : gaNeshastutiHvirochanAtrishirasakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 29 | 5.29. 48-64||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# વિરોચનાત્રિશિરસકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
વિરોચનાત્રિશિરસાવૂચતુઃ ।
ગણેશાય નમસ્તુભ્યં નમઃ સર્વપ્રિયઙ્કર ।
બ્રહ્મણે બ્રહ્મનાથાય વિઘ્નેશાય નમો નમઃ ॥ ૪૮॥
હેરમ્બાય પરેશાય મૂષકધ્વજિને નમઃ ।
આત્મનેઽનાત્મને તુભ્યં નમો લમ્બોદરાય વૈ ॥ ૪૯॥
અનામય હ્યનાધાર સર્વાધાર સુમૂર્તયે ।
વક્રતુણ્ડાય સર્વેષાં નમઃ પૂજ્યાય તે નમઃ ॥ ૫૦॥
આદિમધ્યાન્તહીનાય તદાકારાય ઢુણ્ઢયે ।
જ્યેષ્ઠરાજાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૫૧॥
સર્વાદિશૂર્પકર્ણાય પૂર્ણાય ધરણીધર ।
શેષનાભિવિભૂષાય નમશ્ચિન્તામણે નમઃ ॥ ૫૨॥
સિદ્ધિબુદ્ધિપ્રદાત્રે તે સ્વાનન્દે વાસકારિણે ।
ભક્તેભ્યઃ શાન્તિદાત્રે વૈ શાન્તિસ્થાય નમો નમઃ ॥ ૫૩॥
સિદ્ધિબુદ્ધિવરાયૈવ નમો મૂષકવાહન ।
ગજાનનાય જ્યેષ્ઠેભ્યઃ પદજ્યેષ્ઠપ્રદાયિને ॥ ૫૪॥
ધન્યૌ માતા પિતા નાથ કુલશીલાદિકં ચ મે ।
યેન દૃષ્ટો ગણાધીશો વેદાન્તાગોચરો વિભુઃ ॥ ૫૫॥
વેદા વિદુર્નો ન ચ યોગિનોઽયં બ્રહ્માદયો વેદવિદઃ શિવાદયઃ ।
શાન્ત્યા પ્રલભ્યં ગણનાથમેવં પશ્યાવહે ચિત્રમિદં ન સંશયઃ ॥ ૫૬॥
પરાત્પરસ્ત્વં પરમપ્રમેયઃ કથં મહાત્મન્ સદને ગતો મમ ।
ન મત્સમો હ્યણ્ડકટાહમધ્યે ગણેશ તે પાદસમીપગાદહો ॥ ૫૭॥
એવં સંસ્તુવતસ્તસ્ય સસ્ત્રીકસ્ય મહામુને ।
અત્યન્તભક્તિમાહાત્મ્યાત્ કણ્ઠરોધઃ સમાભવત્ ॥ ૫૮॥
નનર્ત પરમાનન્દયુક્તસ્તત્ર પ્રજાપતે ।

સરોમાઞ્ચો ન સસ્માર યથા ભ્રાન્તશ્ચ સાશ્રુકઃ ॥ ૫૯॥
તતસ્તં ગણનાથો વૈ જગાદ વચનં હિતમ્ ।
સ્વયં સાશ્રુઃ સરોમાઞ્ચો ભક્તિં દૃષ્ટ્વા મહામુને ॥ ૬૦॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં મમ પ્રીતિકરં બહુ ।
ભવિષ્યતિ જનાનાં વૈ મુને મદ્ભક્તિવર્ધનમ્ ॥ ૬૧॥
યઃ પઠિષ્યતિ યો મર્ત્યઃ શ્રોષ્યતે સર્વમાલભેત્ ।
ભુક્તિં મુક્તિં બ્રહ્મભૂયં સર્વદા મત્પ્રિયો ભવેત્ ॥ ૬૨॥
વરાન્ વૃણુ મહાયોગિંસ્ત્રિશિરો મનસીપ્સિતાન્ ।
સર્વં દાસ્યામિ ભક્ત્યા તે તોષિતોઽહં ન સંશયઃ ॥ ૬૩॥
ગણેશવચનં શ્રુત્વા સસ્ત્રીકસ્ત્રિશિરાઃ પુનઃ ।
ઉવાચ તં પ્રણમ્યાદૌ ભક્ત્યા નમ્રો મહામુનિઃ ॥ ૬૪॥

ઇતિ વિરોચનાત્રિશિરસકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૨૯ । ૫.૨૯। ૪૮-૬૪॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 29 . 5.29. 48-64..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Virochanatrishirasakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*